# શ્રીલક્ષ્મીસ્તુતિઃ

Shri Lakshmistutih

sanskritdocuments.org

May 13, 2018

# Shri Lakshmistutih

# શ્રીલક્ષ્મીસ્તુતિઃ

## Sanskrit Document Information

Text title : lakShmIstutiH

File name : lakShmIstutiH.itx

Category : devii, lakShmI

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રીલક્ષ્મીસ્તુતિઃ

જયન્તિ જગતાં માતુઃ સ્તનકુઙ્કુમબિન્દવઃ ।
મુકુન્દાશ્લેષસઙ્ક્રાન્તકૌસ્તુભશ્રીવિડમ્બનઃ ॥ ૧॥

પાયાત્પયોધિદુહિતુઃ કપોલામલચન્દ્રમાઃ ।
યત્ર સઙ્ક્રાન્તબિમ્બેન હરિણા હરિણાયિતમ્ ॥ ૨॥

દેવેઽર્પિતવરણસ્રજિ બહુમાયે વહતિ કૈટભીરૂપમ્ ।
જયતિ સુરાસુરહસિતા લજ્જાજિહ્મેક્ષણા લક્ષ્મીઃ ॥ ૩॥

તલ્પીકૃતાહિરગણિતગરુડો હારાભિહતવિધિર્જયતિ ।
ફણશતપીતશ્વાસો રાગાન્ધાયાઃ શ્રિયઃ કેલિઃ ॥ ૪॥

સ્મેરાનનેન હરિણા સસ્પૃહમાકારવેદિનાઽઽકલિતમ્ ।
જયતિ પુરુષાયિતાયાઃ કમલાયાઃ કૈટભીધ્યાનમ્ ॥ ૫॥

કમલાસનકમલેક્ષણકમલારિકિરીટકમલભૃદ્વાહૈઃ ।
નુતપદકમલા કમલા કરધૃતકમલા કરોતુ મે કમલમ્ ॥ ૬॥

કિઞ્જલ્કરાજિરિવ નીલસરોજલગ્ના
લેખેવ કાઞ્ચનમયી નિકષોપલસ્થા ।
સૌદામિની જલદમણ્ડલગામિનીવ
પાયાદુરઃસ્થલગતા કમલા મુરારેઃ ॥ ૭॥

દન્તૈઃ કોરકિતા સ્મિતૈર્વિકસિતા ભ્રૂવિભ્રમૈઃ પત્રિતા
દોર્ભ્યાં પલ્લવિતા નખૈઃ કુસુમિતા લીલાભિરુદ્વેલિતા ।
ઉત્તુઙ્ગસ્તનમણ્ડલેન ફલિતા ભક્તાભિલાષે હિતા
કાચિત્કલ્પલતા સુરાસુરનુતા પાયાત્સુધાબ્ધેઃ સુતા ॥ ૮॥

ઉત્તુઙ્ગસ્તનમણ્ડલોપરિલસત્પ્રાલમ્બમુક્તામણેઃ
અન્તર્બિમ્બિતમિન્દ્રનીલનિકરચ્છાયાનુકારિદ્યુતિ ।
લજ્જાવ્યાજમુપેત્ય નમ્રવદના સ્પષ્ટં મુરારેર્વપુઃ

પશ્યન્તી મુદિતા મુદેઽસ્તુ ભવતાં લક્ષ્મીર્વિવાહોત્સવે ॥ ૯॥

આખ્યાતે હસિતં પિતામહ ઇતિ ત્રસ્તં કપાલીતિ ચ
વ્યાવૃત્તં ગુરુરિત્યયં દહન ઇત્યાવિષ્કૃતા ભીરુતા ।
પૌલોમીપતિરિત્યસૂયિતમથ વ્રીડાવિનમ્રશ્રિયા
પાયાદ્વઃ પુરુષોત્તમોઽયમિતિ યો ન્યસ્તઃ સ પુષ્પાઞ્જલિઃ ॥ ૧૦॥

ક્રીડાભિન્નહિરણ્યશુક્તિકુહરે રક્તાત્મનાવસ્થિતાન્
હારં હારમુદારકુઙ્કુમરસાનવ્યાજભવ્યાન્નખૈઃ ।
વીરશ્રીકુચકુમ્ભસીમ્નિ લિખતો વીરસ્ય પત્રાવલીઃ
તત્કાલોચિત ભાવબન્ધમધુરં મન્દસ્મિતં પાતુ વઃ ॥ ૧૧॥

પદ્માયાઃ સ્તનહેમસદ્મનિ મણિશ્રેણીસમાકર્ષકે
કિઞ્ચિત્કઞ્ચુકસન્ધિસન્નિધિગતે શૌરેઃ કરે તસ્કરે ।
સદ્યો જાગૃહિ જાગૃહીતિ વલયધ્વાનૈર્ધ્રુવં ગર્જતા
કામેન પ્રતિબોધિતાઃ પ્રહરિકા રોમાઙ્કુરાઃ પાન્તુ વઃ ॥ ૧૨॥

યાદૃગ્જાનાસિ જામ્બૂનદગિરિશિખરે કાન્તિરિન્દોઃ કલાનાં
ઇત્યૌત્સુક્યેન પત્યૌ સ્મિતમધુરમુખામ્ભોરુહં ભાષમાણે ।
લીલાદોલાયમાનશ્રુતિકમલમિલદ્ભૃઙ્ગસઙ્ગીતસાક્ષી
પાયાદમ્ભોધિજાયાઃ કુસુમશરકલાનાટ્યનાન્દીનકારઃ ॥ ૧૩॥

ઉત્તિષ્ઠન્ત્યા  રતાન્તે ભરમુરગપતૌ પાણિનૈકેન કૃત્વા
ધૃત્વા ચાન્યેન વાસો વિગલિતકબરીભારમંસે વહન્ત્યાઃ ।
ભૂયસ્તત્કાલકાન્તદ્વિગુણિતસુરતપ્રીતિના શૌરિણા વઃ
શય્યામાલિઙ્ગ્ય નીતં વપુરલસલસદ્બાહુ લક્ષ્મ્યાઃ પુનાતુ ॥ ૧૪॥

ઇતિ શ્રીલક્ષ્મીસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Lakshmistutih*

pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*